# श्रीमद् भगवद् गीता Śrīmad Bhaga-vad Gī-tā
## Chapter 3 Verses 1 - 43

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ |
| श्रीमद् भगवद् गीता | śrīmad bha-ga-vad gī-tā |
| अथ तृतीयोऽध्यायः । | a-tha tṛ-tī-yo'dhyā-yaḥ । |
| कर्मयोगः । | kar-ma-yo-gaḥ । |

| | |
|---|---|
| अर्जुन उवाच । | arjuna u-vā-ca । |
| ज्यायसी चेत्कर्मणस्ते | jyā-ya-sī cet-kar-ma-ṇas-te |
| मता बुद्धिर्जनार्दन । | ma-tā bud-dhir-ja-nār-da-na । |
| तत्किं कर्मणि घोरे मां | tat-kiṁ kar-ma-ṇi gho-re māṁ |
| नियोजयसि केशव ॥ ३-१ ॥ | ni-yo-ja-ya-si ke-śa-va ।। 3-1।। |

| | |
|---|---|
| व्यामिश्रेणेव वाक्येन | vyā-mi-śre-ṇe-va vāk-ye-na |
| बुद्धिं मोहयसीव मे । | bud-dhiṁ mo-ha-ya-sī-va me । |
| तदेकं वद निश्चित्य | ta-de-kaṁ va-da niś-cit-ya |
| येन श्रेयोऽहमाप्नुयाम् ॥ ३-२ ॥ | ye-na śre-yo'ham-āp-nu-yām ।। 3-2।। |
| | |
| श्रीभगवानुवाच । | śrī bha-ga-vān-u-vā-ca । |
| लोकेऽस्मिन् द्विविधा निष्ठा | lo-ke's-min dvi-vi-dhā niṣ-ṭhā |
| पुरा प्रोक्ता मयानघ । | pu-rā prok-tā ma-yā-na-gha । |
| ज्ञानयोगेन साङ्ख्यानां | jñā-na-yo-ge-na sāṅ-khyā-nāṁ |
| कर्मयोगेन योगिनाम् ॥ ३-३ ॥ | kar-ma-yo-ge-na yo-gi-nām ।। 3-3।। |
| | |
| न कर्मणामनारम्भात् | na kar-ma-ṇām-anā-ram-bhāt |
| नैष्कर्म्यं पुरुषोऽश्नुते । | naiṣ-karm-yaṁ pu-ru-ṣo'ś-nu-te । |
| न च संन्यसनादेव | na ca san-nya-sa-nā-de-va |
| सिद्धिं समधिगच्छति ॥ ३-४ ॥ | sid-dhiṁ sa-ma-dhi-gac-cha-ti ।। 3-4।। |

न हि कश्चित्क्षणमपि
जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म
सर्वः प्रकृतिजैर्गुणैः॥ ३-५॥

na hi kaś-cit-kṣa-ṇam-api
jā-tu tiṣ-ṭhat-ya-kar-ma-kṛt ।
kār-ya-te hya-va-śaḥ kar-ma
sar-vaḥ pra-kṛ-ti-jair-gu-ṇaiḥ ।। 3-5।।

कर्मेन्द्रियाणि संयम्य
य आस्ते मनसा स्मरन्।
इन्द्रियार्थान्विमूढात्मा
मिथ्याचारस्स उच्यते॥ ३-६॥

kar-men-dri-yā-ṇi saṁ-yam-ya
ya ā-ste ma-na-sā sma-ran ।
in-dri-yār-thān-vi-mū-ḍhāt-mā
mith-yā-cā-ras-sa uc-ya-te ।। 3-6।।

यस्त्विन्द्रियाणि मनसा
नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगम्
असक्तस्स विशिष्यते॥ ३-७॥

yas-tvin-dri-yā-ṇi ma-na-sā
ni-yam-yā-ra-bha-te'r-ju-na ।
kar-men-dri-yaiḥ kar-ma-yo-gam
a-sak-tas-sa vi-śiṣ-ya-te ।। 3-7।।

| | |
|---|---|
| नियतं कुरु कर्म त्वं | ni-ya-taṁ ku-ru kar-ma tvaṁ |
| कर्म ज्यायो ह्यकर्मणः । | kar-ma jyā-yo hya-kar-ma-ṇaḥ । |
| शरीरयात्रापि च ते | śa-rī-ra-yā-trā-pi ca te |
| न प्रसिद्ध्येदकर्मणः ॥ ३-८ ॥ | na pra-sid-dhye-da-kar-ma-ṇaḥ ।। 3-8।। |

| | |
|---|---|
| यज्ञार्थात्कर्मणोऽन्यत्र | ya-jñār-thāt-kar-ma-ṇo'n-yat-ra |
| लोकोऽयं कर्मबन्धनः । | lo-ko-'yaṁ kar-ma-ban-dha-naḥ । |
| तदर्थं कर्म कौन्तेय | ta-dar-thaṁ kar-ma kaun-te-ya |
| मुक्तसङ्गस्समाचर ॥ ३-९ ॥ | muk-ta-saṅ-gas-sa-mā-ca-ra ।। 3-9।। |

| | |
|---|---|
| सहयज्ञाः प्रजास्सृष्ट्वा | sa-ha-ya-jñāḥ pra-jās-sṛṣ-ṭ-vā |
| पुरोवाच प्रजापतिः । | pu-ro-vā-ca pra-jā-pa-tiḥ । |
| अनेन प्रसविष्यध्वम् | a-ne-na pra-sa-viṣ-yadh-vam |
| एष वोऽस्त्विष्टकामधुक् ॥ ३-१० ॥ | eṣa vo's-tviṣ-ṭa-kā-ma-dhuk ।। 3-10।। |

| | |
|---|---|
| देवान्भावयतानेन | de-vān-bhā-va-ya-tā-ne-na |
| ते देवा भावयन्तु वः। | te de-vā bhā-va-yan-tu vaḥ \| |
| परस्परं भावयन्तः | pa-ras-pa-raṁ bhā-va-yan-taḥ |
| श्रेयः परमवाप्स्यथ ॥ ३-११ ॥ | śre-yaḥ pa-ra-ma-vāps-ya-tha \|\| 3-11\|\| |

| | |
|---|---|
| इष्टान्भोगान्हि वो देवाः | iṣ-ṭān-bho-gān-hi vo de-vāḥ |
| दास्यन्ते यज्ञभाविताः। | dās-yan-te ya-jña-bhā-vi-tāḥ \| |
| तैर्दत्तानप्रदायैभ्यः | tair-dat-tā-na-pra-dā-yai-bhyaḥ |
| यो भुङ्क्ते स्तेन एव सः ॥ ३-१२ ॥ | yo bhuṅk-te ste-na e-va saḥ \|\| 3-12\|\| |

| | |
|---|---|
| यज्ञशिष्टाशिनस्सन्तः | ya-jña-śiṣ-ṭā-śi-nas-san-taḥ |
| मुच्यन्ते सर्वकिल्बिषैः। | muc-yan-te sar-va-kil-bi-ṣaiḥ \| |
| भुञ्जते ते त्वघं पापाः | bhuñ-ja-te te tva-ghaṁ pā-pāḥ |
| ये पचन्त्यात्मकारणात् ॥ ३-१३ ॥ | ye pa-can-tyāt-ma-kā-ra-ṇāt \|\| 3-13\|\| |

| | |
|---|---|
| अन्नाद्भवन्ति भूतानि | an-nād-bha-van-ti bhū-tā-ni |
| पर्जन्यादन्नसम्भवः । | par-jan-yād-an-na-sam-bha-vaḥ । |
| यज्ञाद्भवति पर्जन्यः | ya-jñād-bha-va-ti par-jan-yaḥ |
| यज्ञः कर्मसमुद्भवः ॥ ३-१४ ॥ | ya-jñaḥ kar-ma-sa-mud-bha-vaḥ ।। 3-14।। |
| | |
| कर्म ब्रह्मोद्भवं विद्धि | kar-ma brah-mod-bha-vaṁ viddhi |
| ब्रह्माक्षरसमुद्भवम् । | brah-māk-ṣa-ra-sa-mud-bha-vam । |
| तस्मात्सर्वगतं ब्रह्म | tas-māt-sar-va-ga-taṁ brah-ma |
| नित्यं यज्ञे प्रतिष्ठितम् ॥ ३-१५ ॥ | nit-yaṁ ya-jñe pra-tiṣ-ṭhi-tam ।। 3-15।। |
| | |
| एवं प्रवर्तितं चक्रं | e-vaṁ pra-var-ti-taṁ cak-raṁ |
| नानुवर्तयतीह यः । | nā-nu-var-ta-ya-tī-ha yaḥ । |
| अघायुरिन्द्रियारामः | a-ghā-yu-rin-dri-yā-rā-maḥ |
| मोघं पार्थ स जीवति ॥ ३-१६ ॥ | mo-ghaṁ pār-tha sa jī-va-ti ।। 3-16।। |

| | |
|---|---|
| यस्त्वात्मरतिरेव स्यात् | yas-tvāt-ma-ra-ti-re-va syāt |
| आत्मतृप्तश्च मानवः । | ātma-tṛp-taś-ca mā-na-vaḥ \| |
| आत्मन्येव च सन्तुष्टः | ātman-ye-va ca san-tuṣ-ṭaḥ |
| तस्य कार्यं न विद्यते ॥ ३-१७ ॥ | tas-ya kār-yaṁ na vid-ya-te \|\| 3-17\|\| |
| नैव तस्य कृतेनार्थः | nai-va tas-ya kṛ-te-nār-thaḥ |
| नाकृतेनेह कश्चन । | nā-kṛ-te-ne-ha kaś-ca-na \| |
| न चास्य सर्वभूतेषु | na cās-ya sar-va-bhū-te-ṣu |
| कश्चिदर्थव्यपाश्रयः ॥ ३-१८ ॥ | kaś-cid-ar-tha-vya-pā-śra-yaḥ \|\| 3-18\|\| |
| तस्मादसक्तस्सततं | tas-mād-a-sak-tas-sa-ta-taṁ |
| कार्यं कर्म समाचर । | kār-yaṁ kar-ma sa-mā-ca-ra \| |
| असक्तो ह्याचरन्कर्म | a-sak-to hyā-ca-ran-kar-ma |
| परमाप्नोति पूरुषः ॥ ३-१९ ॥ | pa-ra-māp-no-ti pū-ru-ṣaḥ \|\| 3-19\|\| |

| | |
|---|---|
| कर्मणैव हि संसिद्धिम् | kar-ma-ṇai-va hi saṁ-sid-dhim |
| आस्थिता जनकादयः । | ās-thi-tā ja-na-kā-da-yaḥ \| |
| लोकसंग्रहमेवापि | lo-ka-saṅ-gra-ham-e-vā-pi |
| सम्पश्यन्कर्तुमर्हसि ॥ ३-२० ॥ | sam-paś-yan-kar-tum-ar-ha-si \|\| 3-20\|\| |

*Sri Gurudev, Swami Chinmayananda, guidance was that this verse be recited three times.*

| | |
|---|---|
| यद्यदाचरति श्रेष्ठः | yad-ya-dā-ca-ra-ti śreṣ-ṭhaḥ |
| तत्तदेवेतरो जनः । | tat-tad-e-ve-ta-ro ja-naḥ \| |
| स यत्प्रमाणं कुरुते | sa yat-pra-mā-ṇaṁ ku-ru-te |
| लोकस्तदनुवर्तते ॥ ३-२१ ॥ | lo-kas-ta-da-nu-var-ta-te \|\| 3-21 \|\| |

*Sri Gurudev, Swami Chinmayananda, guidance was that this verse be recited three times.*

| | |
|---|---|
| न मे पार्थास्ति कर्तव्यं | na me pār-thās-ti kar-tav-yaṁ |
| त्रिषु लोकेषु किञ्चन । | tri-ṣu lo-ke-ṣu kiñ-ca-na \| |
| नानवाप्तमवाप्तव्यं | nā-na-vāp-ta-ma-vāp-tav-yaṁ |
| वर्त एव च कर्मणि ॥ ३-२२ ॥ | var-ta eva ca kar-ma-ṇi \|\|3-22\|\| |

| | |
|---|---|
| यदि ह्यहं न वर्तेयं | ya-di hya-haṁ na var-te-yaṁ |
| जातु कर्मण्यतन्द्रितः । | jā-tu kar-maṇ-ya-tan-dri-taḥ \| |
| मम वर्त्मानुवर्तन्ते | ma-ma vart-mā-nu-var-tan-te |
| मनुष्याः पार्थ सर्वशः ॥ ३-२३ ॥ | ma-nuṣ-yāḥ pār-tha sar-va-śaḥ \|\|3-23\|\| |
| उत्सीदेयुरिमे लोकाः | ut-sī-de-yu-ri-me lo-kāḥ |
| न कुर्यां कर्म चेदहम् । | na kur-yāṁ kar-ma ce-da-ham \| |
| सङ्करस्य च कर्ता स्याम् | saṅ-ka-ras-ya ca kar-tā syām |
| उपहन्यामिमाः प्रजाः ॥ ३-२४ ॥ | u-pa-han-yām-imāḥ pra-jāḥ \|\|3-24\|\| |
| सक्ताः कर्मण्यविद्वांसः | sak-tāḥ kar-maṇ-ya-vid-vāṁ-saḥ |
| यथा कुर्वन्ति भारत । | ya-thā kur-van-ti bhā-ra-ta \| |
| कुर्याद्विद्वांस्तथासक्तः | kur-yād-vid-vāṁs-ta-thā-sak-taḥ |
| चिकीर्षुर्लोकसङ्ग्रहम् ॥ ३-२५ ॥ | ci-kīr-ṣur-lo-ka-saṅ-gra-ham \|\|3-25\|\| |

न बुद्धिभेदं जनयेत्
अज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि
विद्वान्युक्तस्समाचरन् ॥ ३-२६ ॥

na bud-dhi-bhe-daṁ ja-na-yet
a-jñā-nāṁ kar-ma-saṅ-gi-nām |
jo-ṣa-yet-sar-va-kar-mā-ṇi
vid-vān-yuk-tas-sa-mā-ca-ran ||3-26||

प्रकृतेः क्रियमाणानि
गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा
कर्ताहमिति मन्यते ॥ ३-२७ ॥

pra-kṛ-teḥ kri-ya-mā-ṇā-ni
gu-ṇaiḥ kar-mā-ṇi sar-va-śaḥ |
a-haṅ-kā-ra-vi-mū-ḍhāt-mā
kar-tā-ham-iti man-ya-te ||3-27||

तत्त्वविन्तु महाबाहो
गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्ते
इति मत्वा न सज्जते ॥ ३-२८ ॥

tat-tva-vit-tu ma-hā-bā-ho
gu-ṇa-kar-ma-vi-bhā-ga-yoḥ |
gu-ṇā gu-ṇe-ṣu var-tan-te
i-ti mat-vā na saj-ja-te ||3-28||

| | |
|---|---|
| प्रकृतेर्गुणसम्मूढाः | pra-kṛ-ter-gu-ṇa-sam-mū-ḍhāḥ |
| सज्जन्ते गुणकर्मसु । | saj-jan-te gu-ṇa-kar-ma-su । |
| तानकृत्स्नविदो मन्दान् | tā-na-kṛts-na-vi-do man-dān |
| कृत्स्नविन्न विचालयेत् ॥ ३-२९ ॥ | kṛts-na-vin-na vi-cā-la-yet ।।3-29।। |
| | |
| मयि सर्वाणि कर्माणि | mayi sar-vā-ṇi kar-mā-ṇi |
| संन्यस्याध्यात्मचेतसा । | san-nyas-yā-dhyāt-ma-ce-ta-sā । |
| निराशीर्निर्ममो भूत्वा | ni-rā-śīr-nir-ma-mo bhū-tvā |
| युध्यस्व विगतज्वरः ॥ ३-३० ॥ | yudh-yas-va vi-ga-ta-jva-raḥ ।।3-30।। |
| | |
| ये मे मतमिदं नित्यम् | ye me ma-tam-i-daṁ nit-yam |
| अनुतिष्ठन्ति मानवाः । | a-nu-tiṣ-ṭhan-ti mā-na-vāḥ । |
| श्रद्धावन्तोऽनसूयन्तः | śrad-dhā-van-to'na-sū-yan-taḥ |
| मुच्यन्ते तेऽपि कर्मभिः ॥ ३-३१ ॥ | muc-yan-te te'pi kar-ma-bhiḥ ।।3-31।। |

| | |
|---|---|
| ये त्वेतदभ्यसूयन्तः | ye tve-ta-dabh-ya-sū-yan-taḥ |
| नानुतिष्ठन्ति मे मतम् । | nā-nu-tiṣ-ṭhan-ti me ma-tam \| |
| सर्वज्ञानविमूढांस्तान् | sar-va-jñā-na-vi-mū-ḍhāṁs-tān |
| विद्धि नष्टानचेतसः ॥ ३-३२ ॥ | vid-dhi naṣ-ṭā-na-ce-ta-saḥ \|\|3-32\|\| |
| सदृशं चेष्टते स्वस्याः | sa-dṛ-śaṁ ceṣ-ṭa-te svas-yāḥ |
| प्रकृतेर्ज्ञानवानपि । | pra-kṛ-ter-jñā-na-vān-a-pi \| |
| प्रकृतिं यान्ति भूतानि | pra-kṛ-tiṁ yān-ti bhū-tā-ni |
| निग्रहः किं करिष्यति ॥ ३-३३ ॥ | ni-gra-haḥ kiṁ ka-riṣ-ya-ti \|\|3-33\|\| |
| इन्द्रियस्येन्द्रियस्यार्थे | in-dri-yas-yen-dri-yas-yār-the |
| रागद्वेषौ व्यवस्थितौ । | rā-ga-dve-ṣau vya-vas-thi-tau \| |
| तयोर्न वशमागच्छेत् | ta-yor-na va-śa-mā-gac-chet |
| तौ ह्यस्य परिपन्थिनौ ॥ ३-३४ ॥ | tau hyas-ya pa-ri-pan-thi-nau \|\|3-34\|\| |

| | |
|---|---|
| श्रेयान्स्वधर्मो विगुणः | śre-yān-sva-dhar-mo vi-gu-ṇaḥ |
| परधर्मात्स्वनुष्ठितात् । | pa-ra-dhar-māt-sva-nuṣ-ṭhi-tāt । |
| स्वधर्मे निधनं श्रेयः | sva-dhar-me ni-dha-naṁ śre-yaḥ |
| परधर्मो भयावहः ॥ ३-३५ ॥ | pa-ra-dhar-mo bha-yā-va-haḥ ।।3-35।। |
| अर्जुन उवाच । | ar-ju-na u-vā-ca । |
| अथ केन प्रयुक्तोऽयं | a-tha ke-na pra-yuk-to'yaṁ |
| पापं चरति पूरुषः । | pā-paṁ ca-ra-ti pū-ru-ṣaḥ । |
| अनिच्छन्नपि वार्ष्णेय | a-nic-chan-na-pi vārṣ-ṇe-ya |
| बलादिव नियोजितः ॥ ३-३६ ॥ | ba-lā-di-va ni-yo-ji-taḥ ।।3-36।। |
| श्रीभगवानुवाच । | śrī-bha-ga-vān-u-vā-ca । |
| काम एष क्रोध एषः | kā-ma e-ṣa kro-dha e-ṣaḥ |
| रजोगुणसमुद्भवः । | ra-jo-gu-ṇa-sa-mud-bha-vaḥ । |
| महाशनो महापाप्मा | ma-hā-śa-no ma-hā-pāp-mā |
| विद्ध्येनमिह वैरिणम् ॥ ३-३७ ॥ | vid-dhye-nam-i-ha vai-ri-ṇam ।।3-37।। |

| | |
|---|---|
| धूमेनाव्रियते वह्निः | dhū-me-nā-vri-ya-te vah-niḥ |
| यथादर्शो मलेन च । | ya-thā-dar-śo ma-le-na ca । |
| यथोल्बेनावृतो गर्भः | ya-thol-be-nā-vṛ-to gar-bhaḥ |
| तथा तेनेदमावृतम् ॥ ३-३८ ॥ | ta-thā te-ne-da-mā-vṛ-tam ।।3-38।। |
| | |
| आवृतं ज्ञानमेतेन | ā-vṛ-taṁ jñā-nam-e-te-na |
| ज्ञानिनो नित्यवैरिणा । | jñā-ni-no nit-ya-vai-ri-ṇā । |
| कामरूपेण कौन्तेय | kā-ma-rū-pe-ṇa kaun-te-ya |
| दुष्पूरेणानलेन च ॥ ३-३९ ॥ | duṣ-pū-re-ṇā-na-le-na ca ।।3-39।। |
| | |
| इन्द्रियाणि मनो बुद्धिः | in-dri-yā-ṇi ma-no bud-dhiḥ |
| अस्याधिष्ठानमुच्यते । | as-yā-dhiṣ-ṭhā-na-muc-ya-te । |
| एतैर्विमोहयत्येषः | e-tair-vi-mo-ha-yat-ye-ṣaḥ |
| ज्ञानमावृत्य देहिनम् ॥ ३-४० ॥ | jñā-nam-ā-vṛt-ya de-hi-nam ।।3-40।। |

| | |
|---|---|
| तस्मात्त्वमिन्द्रियाण्यादौ | tas-māt-tvam-in-dri-yāṇ-yā-dau |
| नियम्य भरतर्षभ । | ni-yam-ya bha-ra-tar-ṣa-bha \| |
| पाप्मानं प्रजहि ह्येनं | pāp-mā-naṁ pra-ja-hi hye-naṁ |
| ज्ञानविज्ञाननाशनम् ॥ ३-४१ ॥ | jñā-na-vi-jñā-na-nā-śa-nam \|\|3-41\|\| |

| | |
|---|---|
| इन्द्रियाणि पराण्याहुः | in-dri-yā-ṇi pa-rāṇ-yā-huḥ |
| इन्द्रियेभ्यः परं मनः । | in-dri-ye-bhyaḥ pa-raṁ ma-naḥ \| |
| मनसस्तु परा बुद्धिः | ma-na-sas-tu pa-rā bud-dhiḥ |
| यो बुद्धेः परतस्तु सः ॥ ३-४२ ॥ | yo bud-dheḥ pa-ra-tas-tu saḥ \|\|3-42\|\| |

| | |
|---|---|
| एवं बुद्धेः परं बुद्ध्वा | e-vaṁ bud-dheḥ pa-raṁ bud-dhvā |
| संस्तभ्यात्मानमात्मना । | saṁ-sta-bhyāt-mā-nam-āt-ma-nā \| |
| जहि शत्रुं महाबाहो | ja-hi śa-truṁ ma-hā-bā-ho |
| कामरूपं दुरासदम् ॥ ३-४३ ॥ | kā-ma-rū-paṁ du-rā-sa-dam \|\|3-43\|\| |



| | |
|---|---|
| ॐ तत्सत् | om  tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti  śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायां | brahma-vid-yā-yāṁ |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| कर्म योगो नाम | karma  yo-go  nā-ma |
| तृतीयोऽध्यायः। | tṛ-tī-yo'dhyā-yaḥ । |
| ॐ हरिःॐ | om  hariḥ  om |
| श्री गुरुभ्यो नमः | śrī  guru-bhyo  namaḥ |
| हरिः ॐ | hariḥ  om |

| | |
|---|---|
| सर्वधर्मान्परित्यज्य | sar-va-dhar-mān-pari-tyaj-ya |
| मामेकं शरणं व्रज । | mām-ekaṁ śara-ṇaṁ vra-ja \| |
| अहं त्वा सर्वपापेभ्यः | ahaṁ tvā sar-va-pā-pebh-yaḥ |
| मोक्षयिष्यामि मा शुचः ॥ १८-६६ ॥ | mokṣa-yiṣ-yā-mi mā śu-caḥ \|\| 18-66\|\| |